# Jaigishavyakritam Shivabhaktimahimavarnanam

# જૈગીષવ્યકૃતં શિવભક્તિમહિમાવર્ણનમ્

## Document Information

Text title : Jaigishavyakritam Shivabhaktimahimavarnanam

File name : shivabhaktimahimAvarNanamjaigIShavyakRRitaM.itx

Category : shiva, shivarahasya

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | mAheshvarAkhyaH prathamAMshaH | adhyAyaH 6 - jaigIShavyAgamanam | 1-26(1) ||

Latest update : December 17, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 17, 2023

*sanskritdocuments.org*

# જૈગીષવ્યકૃતં શિવભક્તિમહિમાવર્ણનમ્

ત્વમેવ દેવદેવેશ પિતા માતા સખા પ્રભુઃ ।
ત્વમેવ સર્વં દેવેશ વિશ્વેશ્વર મહેશ્વર ॥ ૬.૧॥

નજાને ગિરિજાજાને ત્વત્તોહ્યન્યં સુરેશ્વર ।
તસ્માત્પ્રસીદ ભગવન્ કરુણાસાગરાધુના ॥ ૬.૨॥

પ્રપન્નોઽસ્મિ પદદ્વન્દ્વં નિર્દ્વન્દ્વં તે મહેશ્વર ।
ભ્રાતરૌ સ્કન્દહેરમ્બૌ સખાયો ગણપા મમ ॥ ૬.૩॥

જગતાં જનની ગૌરી જનિત્રી મમ શઙ્કરી ।
જગત્પિતા ત્વમેવેશ પિતા મમ મહેશ્વર ॥ ૬.૪॥

નાન્યં વરં વૃણે દેવ ત્વત્પાદામ્બુજભક્તિતઃ ।
સૈવ ધર્માર્થકામાદિમોક્ષહેતુર્મમાધુના ॥ ૬.૫॥

યયા ભક્ત્યા મહાદેવ મુક્તાસ્સર્વેસુરાસુરાઃ ।
ત્વદ્ભક્ત એવ જગતિમુક્તોઽન્યાન્મોચયત્યપિ ॥ ૬.૬॥

ત્વદ્ભક્ત્યૈવ વિધિર્વિશ્વં સૃજત્યેવ મહેશ્વર ।
ત્વત્તો વેદાનધિગતસ્સત્યલોકાધિપોઽભવત્ ॥ ૬.૭॥

વિષ્ણુસ્તવ પદદ્વન્દ્વં નેત્રાબ્જેન સમર્ચયન્ ।
દૈત્યવૃન્દૈકસંહત્યૈ ચક્રં પ્રાપ સુદર્શનમ્ ॥ ૬.૮॥

ત્વદ્ભક્ત્યૈવ વિરૂપાક્ષ વૈકુણ્ઠસ્યાધિપોઽભવત્ ।
પદ્મસદ્માપતિશ્ચાપિ જાતો રુદ્રસ્ત્વદાશ્રયાત્ ॥ ૬.૯॥

દત્વા શૂલવરં તસ્મૈ રુદ્રાયામિતતેજસે ।
રુદ્રાણામાધિપત્યે ચ ત્વયા સોઽપ્યભિષેચિતઃ ॥ ૬.૧૦॥

યસ્યશૂલાનલજ્વાલાદગ્ધમન્તે ચરાચરમ્ ।
શક્રોઽમરેન્દ્રતાં પ્રાપ્તસ્ત્વદ્ભક્ત્યયૈવ હરાધુના ॥ ૬.૧૧॥

શચીપતિત્વં સમ્પ્રાપ નાનાસ્વર્ગૈકભોગભાક્ ।
ધનાધિપત્વનધનદસ્ત્વદ્ભક્ત્યયૈવ મહેશ્વર ॥ ૬.૧૨॥

યમોઽપિત્વત્પદાર્ચાતો લોકપાલોઽભવચ્છિવ ।
વરુણોયાદસાન્નાથસ્સૂર્યચન્દ્રાનિલાનલાઃ ॥ ૬.૧૩॥

ત્વદ્ભક્ત્યૈવ વિરૂપાક્ષ લેભિરે દિક્પતિત્વતામ્ ।
સમર્ચયન્તિ ત્વલ્લિઙ્ગંભક્ત્યા સર્વેસુરાસુરાઃ ॥ ૬.૧૪॥

સહસ્રભુજતાં પ્રાપ્તો બાણો ભક્ત્યા તવેશ્વર ।
પૌલસ્ત્યતનયશ્શમ્ભો રાવણો લોકરાવણઃ ॥ ૬.૧૫॥

જિગ્યે સુરાન્નૃપવરાંસ્ત્વદ્ભક્ત્યૈવ મહેશ્વર ।
ઘટોદ્ભવેન ત્વદ્ભક્ત્યા સમુદ્રાશ્ચુલુકીકૃતાઃ ॥ ૬.૧૬॥

દધીચિનાપિત્વદ્ભક્ત્યાવિષ્ણવે રૂપમદ્ભુતમ્ ।
દર્શિતમ્માયિને શમ્ભોભૃગુણાશાપિતોહરિઃ ॥ ૬.૧૭॥

ઉપમન્યુનાચબાલેનલબ્ધઃક્ષીરૈકવારિધિઃ ।
ત્વદ્ભક્ત્યાકાલપાશૈશ્ચપાશિતોઽપિમૃકણ્ડુજઃ ॥ ૬.૧૮॥

જિગાય મૃત્યું તરસા શ્વેતોઽપિ નૃપનન્દનઃ ।
શિલાશનેન ત્વદ્ભક્ત્યાપુત્રઃપ્રાપ્તોહ્યયોનિજઃ ॥ ૬.૧૯॥

ત્વદ્ભક્ત્યાનન્દિકેશોઽપિગાણાપત્યમવાપ્તવાન્ ।
ચણ્ડીશ્વરોઽપિપિતરંહતવાંસ્તવભક્તિતઃ ॥ ૬.૨૦॥

મઙ્કણોઽપિપુરાસિદ્ધસ્સિદ્ધિમ્પ્રાપત્વદર્ચનાત્ ।
સોમોઽપિમુક્તવાત્રાજયક્ષ્મતસ્ત્વત્પ્રસાદતઃ ॥ ૬.૨૧॥

દક્ષોઽપિ દીક્ષિતો યજ્ઞે શિક્ષિતોઽનુગ્રહીકૃતઃ ।
શતર્ચનાદયોઽપીશવ્યાઘ્રપાદાદયસ્તથા ॥ ૬.૨૨॥

દુર્વાસાદ્યા મહાભાગા દત્તાત્રેયાદયસ્તથા ।
રામોઽપિ ભાર્ગવશ્શમ્ભો નૃપાણાંકુલઘાતકઃ ॥ ૬.૨૩॥

તથૈવાન્યે નૃપતયસ્સોમસૂર્યાન્વયોદ્ભવઃ ।
આદિતેયાશ્ચ દિતિજા ગણા રુદ્રા મુનીશ્વરાઃ ॥ ૬.૨૪॥

ભૂતા ભવ્યા વર્ષમાના ભક્તાસ્ત્વદ્ભક્તિભાવિતાઃ ।
તવ ભક્ત્યૈવ સર્વેષાં સ્વર્ગમોક્ષૌ હિ શઙ્કર ॥ ૬.૨૫॥

ત્વદ્ભક્તિમેવ યાચેઽહં ત્વનન્યગસિરીશ્વર ।

॥ ઇતિ શિવરહસ્યાન્તર્ગતે માહેશ્વરાખ્યે જૈગીષવ્યકૃતા શિવભક્તિમહિમાવર્ણનમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । માહેશ્વરાખ્યઃ પ્રથમાંશઃ । અધ્યાયઃ ૬ - જૈગીષવ્યાગમનમ્ । ૧-૨૬(૧) ॥

- .. shrIshivarahasyam . mAheshvarAkhyaH prathamAMshaH . adhyAyaH 6 - jaigIShavyAgamanam . 1-26(1) ..

Notes:
Jaigīṣavya જૈગીષવ્ય worships Śiva શિવ as his parent, friend and all-in-all; and, iterates that Śiva શિવ - the Father of the Universe - is his father and Gaurī ગૌરી - the Mother of The Universe - is his Mother. Jaigīṣavya જૈગીષવ્ય further eulogizes Śiva શિવ by highlighting the merits and fruits of ŚivaBhakti શિવભક્તિ as experienced by Viśṇu વિષ્ણુ, Indra ઇન્દ્ર, Dadhīci દધીચિ, Virūpākṣa વિરુપાક્ષ et al.

Encoded and proofread by Ruma Dewan

---

*Jaigishavyakritam Shivabhaktimahimavarnanam*
pdf was typeset on December 17, 2023

Please send corrections to *sanskrit@cheerful.com*